सः, वा, एषः, महान्, अजः, आत्मा, यः, अयम्, विज्ञानमयः, प्राणेषु, यः, एषः, अन्तर्हृदये, आकाशः, तस्मिन्, शेते, सर्वस्य, वशी, सर्वस्य, ईशानः, सर्वस्य, अधिपतिः, सः, न, साधुना, कर्मणा, भूयान्, नो, एव, असाधुना, कनीयान्, एषः, सर्वेश्वरः, एषः, भूताधिपतिः, एषः, भूतपालः, एषः, सेतुः, विधरणः, एषाम्, लोकानाम्, असंभेदाय, तम्, एतम्, वेदानुवचनेन, ब्राह्मणाः, विविदिषन्ति, यज्ञेन, दानेन, तपसा, अनाशकेन, एतम्, एव, विदित्वा, मुनिः, भवति, एतम्, एव, प्रव्राजिनः, लोकम्, इच्छन्तः, प्रव्रजन्ति, एतत्, ह, स्म, वै, तत्, पूर्वे, विद्वांसः, प्रजाम्, न, कामयन्ते, किम्, प्रजया, करिष्यामः, येषाम्, नः, अयम्, आत्मा, अयम्, लोकः, इति, ते, ह, स्म, पुत्रैषणायाः, च, वित्तैषणायाः, च, लोकैषणायाः, च, व्युत्थाय, अथ, भिक्षाचर्यम्, चरन्ति, या, हि, एव, पुत्रैषणा, सा, वित्तैषणा, या, वित्तैषणा, सा, लोकैषणा, उभे, हि, एते, एषणे, एव, भवतः, सः, एषः, न, इति, न, इति, आत्मा, अगृह्यः, न, हि, गृह्यते, अशीर्यः, न, हि, शीर्यते,

असङ्गः, न, हि, सज्यते, असितः, न, व्यथते, न, रिष्यति, एतम्, उ, ह, एव, एते, न, तरतः, इति, अतः, पापम्, अकरवम्, इति, अतः, कल्याणम्, अकरवम्, इति, उभे, उ, ह, एव, एषः, एते, तरति, न, एनम्, कृताकृते, तपतः ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
सः वै	वही	अधिपतिः	अधिपति है
एषः	यह	सः	वह
आत्मा	जीवात्मा	साधुना	अच्छे
महान्	अति बड़ा है	कर्मणा	कर्म करके
अजः	अजन्मा है	न	न
यः	जो	भूयान्	पूज्य
अयम्	यह आत्मा	भवति	होता है
प्राणेषु	चक्षुरादिक इन्द्रियों में से	च	और
विज्ञानमयः	चैतन्यरूप स्थित है	नो	न
च	और	असाधुना	बुरे
यः	जो	कर्मणा	कर्म करके
एषः	यह	कनीयान्	अपूज्य
अन्तर्हृदये	हृदय के भीतर	+ भवति	होता है
आकाशः	आकश है	+ सः	वही
तस्मिन्	उसमें	एषः	यह आत्मा
शेते	शयन करता है	सर्वेश्वरः	सबका ईश्वर है
+ सः	वही	+ सः	वही
सर्वस्य	सबको	एषः	यह आत्मा
वशी	अपने वश में रखने हारा है	भूताधिपतिः	सबका मालिक है
+ सः	वही	+ सः	वही
सर्वस्य	सबका	एषः	यह आत्मा
ईशानः	शासन करनेवाला है	भूतपालः	सबका पालक है
+ सः	वही	+ सः	वही
सर्वस्य	सबका	एषः	यह आत्मा सबका पार लगानेवाला
		सेतुः	सेतु है

+ सः=वही
एषाम्=इन
लोकानाम्=भूर्भुवर्लोकों की
असंभेदाय=रक्षा के लिये
विधरणः=उनका धारण करने वाला है
तम्=उसी
एतम्=इस आत्मा को
ब्राह्मणाः=ब्राह्मण क्षत्रिय वैश्य
वेदानुवचनेन=वेदाध्ययन करके
यज्ञेन=यज्ञ करके
दानेन=दान करके
तपसा=तप करके
अनाशकेन=अनशन व्रत करके
विविदिषन्ति=जानने की इच्छा करते हैं
च=और
एतम्=इसी को
एव=निस्संदेह
विदित्वा=जानकर
पुरुषः=पुरुष
मुनिः=मुनि
भवति=होता है
+ स्वम्=अभीष्ट
लोकम्=लोक की यानी ब्रह्मलोक की
इच्छन्तः=इच्छा करते हुये
प्रव्राजिनः=संन्यासी लोग
एतम् एव=इसी आत्मा का
+ उद्दिश्य=उपदेश पा करके
तत्=उसी अवस्था में
प्रव्रजन्ति=सर्व को त्याग देते हैं

एतत्=यही
तत्=वह
ह स्म वै=निश्चय करके
+ कारणम्=कारण है यानी इसी संन्यस्त धर्मके लियेही
पूर्वे=पूर्वकाल के
विद्वांसः=विद्वान्
प्रजाम्=संतान की
न=नहीं
कामयन्ते + स्म=कामना करते थे
एवम्विचारवन्तः=इस प्रकार विचार करते हुये कि
प्रजया=संतान करके
किम्=क्या
करिष्यामः=हम करेंगे
येषाम्=जिन
नः=हम लोगों का
सहायकः=सहायक
अयम्=यह
आत्मा=आत्मा है
च=और
इति=इसी कारण
ते=वे संन्यासी
ह स्म=निश्चय करके
पुत्रैषणायाः=पुत्र की इच्छा से
वित्तैषणायाः च=द्रव्य की इच्छा से
लोकैषणायाः च=लोकों की इच्छा से
व्युत्थाय=विरक्त होकर
भिक्षाचर्यम्=भिक्षानिमित्त
चरन्ति=फिरते हैं

या=जो
पुत्रैषणा=पुत्र की कामना है
सा=वही
हि एव=निस्सन्देह
वित्तैषणा=धन की कामना है
सा=वही
लोकैषणा=लोक की कामना है
एते=ये
हि=ही
उभे=दो
एषणे=इच्छायें
एव=निस्सन्देह
भवतः=होती हैं
सः=वही प्रसिद्ध
एषः=यह
आत्मा=आत्मा
नेति=नेति
नेति=नेति
इति=शब्द करके
अगृह्यः=अग्राह्य है
हि=क्योंकि
सः=वह
न=नहीं
गृह्यते=ग्रहण किया जा सक्ता है
सः=वह
अशीर्यः=अहिंसनीय है
हि=क्योंकि
+ सः=वह
न=नहीं
शीर्यते=मारा जा सक्ता है
असङ्गः=वह असङ्ग है
हि=क्योंकि
सः न=वह नहीं
सज्यते=किसी में आसक्त है
असितः=वह बन्धनरहित है
हि=क्योंकि
सः न=वह नहीं
व्यथते=पीड़ित होता है
च=और
न=न
+ सः=वह
रिष्यति=हत होता है
उ=और
पापम्=पाप
अकरवम्=मैंने किया था
अतः=इस लिये दुःख भोगूंगा
कल्याणम्=पुण्य मैंने किया था
अतः=इसलिये सुख भोगूंगा
इति=ऐसे
एते=ये
उभे=दोनों इच्छायें
एतम्=इस आत्मा को
न एव=नहीं
तरतः ह=लगती हैं
एषः उ ह=यह आत्मा
एव=अवश्य
तरति=इन दोनों इच्छाओं को पार कर जाता है
एनम्=इस ब्रह्मवित् को
कृताकृते=कृताकृत कर्म
न=नहीं
तपतः=सताते हैं

भावार्थ ।

याज्ञवल्क्य महाराज कहते हैं कि, जो आत्मा चक्षुरादि इन्द्रियों में चैतन्यरूप से स्थित है और जो हृदय के आकाश विषे शयन किये है वही अति बड़ा है, अजन्मा है, सबको अपने वशमें रखनेवाला है, वही सबका शासन करनेवाला है, वही सबका अधिपति है, वही न अच्छे करके पूज्य होता है, न बुरे कर्म करके अपूज्य होता है, वही सबका ईश्वर है, वही सब भूतों का मालिक है, वही सबका पालक है, वही यह आत्मा सबका पार लगानेवाला सेतु है, वही लोकों की रक्षा के लिये उनका धारण करनेवाला है उसी आत्मा को ब्राह्मण, क्षत्रिय, वैश्य वेदाध्ययन करके, यज्ञ करके, दान करके, तप करके, अनशन व्रत करके जानने की इच्छा करते हैं और जो उसको जान जाता है वह मुनि कहलाता है, वही ब्रह्मलोक को प्राप्त होता है. संन्यासी लोग इसी आत्मा के उपदेश को पाकर सबका त्याग कर देते हैं और इसी संन्यस्त धर्म के लियेही पूर्वकाल के विद्वान् लोग संतान की इच्छा नहीं करते थे यह कहते हुये कि हम संतान लेकर क्या करेंगे, जब हम लोगों का सहायक अपनाही आत्मा है और यही कारण था कि वे लोग पुत्र की इच्छा नहीं करते थे. द्रव्य की इच्छा से, पुत्र की इच्छा से, लोकों की इच्छा से विरक्त होकर केवल भिक्षानिमित्त विचरा करते थे. हे राजा जनक ! जो पुत्र की कामना है वही धन की कामना है, वही लोक की कामना है इन तीनों कामनाओं से यह आत्मा पृथक् है, नेति नेति शब्द करके अग्राह्य है क्योंकि यह ग्रहण नहीं किया जा सक्ता है, यह अहिंसनीय है क्योंकि मारा नहीं जा सक्ता है, यह असङ्ग है क्योंकि यह किसी वस्तु में आसक्त नहीं है, यह बन्धनरहित है क्योंकि वह पीड़ित नहीं होता है, न हत होता है, यह वृत्ति कि मैंने पाप किया था इस लिये मैं दुःख भोगूंगा, मैंने पुण्य किया था मैं सुख भोगूंगा इस आत्मा को नहीं लगती है. यह आत्मा अवश्य इन

दोनों द्वन्द्वों को पार कर जाता है और ब्रह्मवित् पुरुष को कृताकृत कर्म नहीं सताता है ॥ २२ ॥

मन्त्रः २३

तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् । तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजोऽविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडेनं प्रापितोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥

पदच्छेदः ।

तत्, एतत्, ऋचा, अभ्युक्तम्, एषः, नित्यः, महिमा, ब्राह्मणस्य, न, वर्धते, कर्मणा, नो, कनीयान्, तस्य, एव, स्यात्, पदवित्, तम्, विदित्वा, न, लिप्यते, कर्मणा, पापकेन, इति, तस्मात्, एवंवित्, शान्तः, दान्तः, उपरतः, तितिक्षुः, समाहितः, भूत्वा, आत्मनि, एव, आत्मानम्, पश्यति, सर्वम्, आत्मानम्, पश्यति, न, एनम्, पाप्मा, तरति, सर्वम्, पाप्मानम्, तरति, न, एनम्, पाप्मा, तपति, सर्वम्, पाप्मानम्, तपति, विपापः, विरजः, अविचिकित्सः, ब्राह्मणः, भवति, एषः, ब्रह्मलोकः, सम्राट्, एनम्, प्रापितः, असि, इति, ह, उवाच, याज्ञवल्क्यः, सः, अहम्, भगवते, विदेहान्, ददामि, मां, च, अपि, सह, दास्याय, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
तत्=वही		ब्राह्मणस्य=ब्रह्मवित् पुरुष की	
एतत्=यह संन्यस्त धर्म		एषः=यह	
ऋचा=मन्त्र करके भी		नित्यः=स्वाभाविक	
अभ्युक्तम्=कहा गया है		महिमा=महिमा है	

न=न
+ सः=वह
कर्मणा=कर्म करके
वर्धते=बढ़ता है
च=और
न=न
कनीयान्=छोटा
+ भवति=होता है
+ यदा=जब
तस्य एव=उस ब्रह्म के महत्त्व का
सः=वह
पदवित्=ज्ञाता
स्यात्=होता है
तदा=तब
तम्=उस महिमा को
विदित्वा=जान कर
पापकेन=पाप
कर्मणा=कर्म करके
न=नहीं
लिप्यते=लिप्त होता है
तस्मात्=इस लिये
एवंवित्=ऐसा जाननेवाला
शान्तः=शान्त
दान्तः=दान्त
उपरतः=उपरत
तितिक्षुः=तितिक्षु
समाहितः=सावधान
एवंवित्=समाहित चित्त
भूत्वा=होकर
आत्मनि एव=अपनेही में
आत्मानम्=परमात्मा को
पश्यति=देखता है
+ च=और
यदा=जब
सर्वम्=सब जगत् को
आत्मानम्=आत्मरूपही
पश्यति=देखता है
तदा=तब
एनम्=इस ज्ञानी को
पाप्मा=पाप
न=नहीं
प्राप्नोति=लगता है
+ किन्तु=किन्तु
+ सः=वह ज्ञानी
सर्वम्=सब
पाप्मानम्=पाप को
तरति=तरता जाता है
एनम्=इस ज्ञानी को
पाप्मा=पाप
न=नहीं
तपति=तपाता है
+ किन्तु=किन्तु
+ सः=वह ज्ञानी
सर्वम्=सब
पाप्मानम्=पाप को
तपति=नष्ट कर देता है
ब्राह्मणः=ब्रह्मवित्
विपापः=पापरहित
विरजः=धर्माधर्म रहित
अविचिकित्सः=निस्सन्देह
भवति=होता है
सम्राट्=हे जनक !
एषः=यही
ब्रह्मलोकः=ब्रह्मलोक है

एनम्=इसी लोक को
+ त्वम्=आप
प्रापितः=पहुँचाये गये
असि=हैं
यदा=जब
इति=इस तरह
याज्ञवल्क्यः=याज्ञवल्क्य ने
उवाच ह=कहा तब
+ जनकः=जनक
+ आह=बोले
सः=वही बोधित
अहम्=मैं
भगवते=आपके लिये
विदेहान्=विदेह देशों को
सह=साथही
माम् च अपि=साथ अपने आपको भी
दास्याय=सेवा के लिये
ददामि=देता हूं

भावार्थ ।

हे राजा जनक ! जिस संन्यासी का जैसा वर्णन होचुका है उसी को मन्त्र भी कहता है, हे राजन् ! ब्रह्मवित् पुरुष की पूर्वोक्त महिमा स्वाभाविक है वह महिमा कर्म से न बढ़ती है न अल्प होती है, वह ब्रह्मवेत्ता पापकर्म से लिप्त नहीं होता है, वह शान्त, दान्त, उपरत, तितिक्षु और समाहित चित्त होकर अपनेही में अपने आत्मा को देखता है और जब सब जगत् को अपनाही आत्मारूप देखता है तब वह ज्ञानी सब पापको पार कर जाता है उस ज्ञानी को पाप नहीं तपाता है किन्तु वह ज्ञानी सब पाप को नष्ट कर देता है, वह ब्रह्मवित् पुरुष पापरहित, धर्मरहित होजाता है. हे जनक ! यही ब्रह्मलोक है, इसी लोक को आप पहुँचाये गये हैं, ऐसा सुनकर जनक महाराज बोले कि, हे प्रभो ! मैं आप के लिये कुल विदेह देशों को और साथही साथ अपने को भी सेवा के लिये अर्पण करता हूं ॥ २३ ॥

मन्त्रः २४

स वा एष महानज आत्मान्नादो वसुदानो विन्दते वसु य एवं वेद ॥

पदच्छेदः ।

सः, वा, एषः, महान्, अजः, आत्मा, अन्नादः, वसुदानः, विन्दते, वसु, यः, एवम्, वेद ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
सः=वही		एवम्=इस प्रकार	
एषः=यह आत्मा		यः=जो	
महान्=सर्वोत्कृष्ट		वेद=जानता है	
अजः=अजन्मा		+ सः=वह ज्ञानी	
अन्नादः=अन्नभोक्ता		वसु=धन को	
वसुदानः=कर्मफल दाता है		विन्दते=प्राप्त होता है	

भावार्थ ।

हे राजा जनक ! यह आत्मा सर्वोत्कृष्ट, अजन्मा, अन्नभोक्ता, कर्मफल का दाता है जो इस प्रकार आत्मा को जानता है वह अनेक प्रकार के धनको प्राप्त होता है ॥ २४ ॥

मन्त्रः २५

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥

इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

पदच्छेदः ।

सः, वा, एषः, महान्, अजः, आत्मा, अजरः, अमरः, अमृतः, अभयः, ब्रह्म, अभयम्, वै, ब्रह्म, अभयम्, हि, वै, ब्रह्म, भवति, यः, एवम्, वेद ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
सः वै=वही		अभयम् ब्रह्म वै=यही अभय ब्रह्म है	
एषः=यह		अभयम् ब्रह्म हि=यही अभय ब्रह्म है	
आत्मा=आत्मा		एवम्=इस प्रकार	
महान्=बड़ा है		यः=जो	
अमरः=अमर है		वेद=जानता है	
अजः=अजन्मा है		सः=वह	
अजरः=जरारहित है		ब्रह्म=ब्रह्मस्वरूप	
अमृतः=मरणधर्मरहित है		भवति=होता है	
अभयः=भयरहित है			

भावार्थ ।

हे राजा जनक ! यह आत्मा सब से बड़ा है, अमर है, अजन्मा

है, जरारहित है, मरणधर्मरहित है, यही अभय है, यही अभय ब्रह्म है, जो पुरुष इस प्रकार जानता है वह ब्रह्मस्वरूप होता है ॥ २५ ॥

इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथ पञ्चमं ब्राह्मणम् ।

मन्त्रः १

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥

पदच्छेदः ।

अथ, ह, याज्ञवल्क्यस्य, द्वे, भार्ये, बभूवतुः, मैत्रेयी, च, कात्यायनी, च, तयोः, ह, मैत्रेयी, ब्रह्मवादिनी, बभूव, स्त्रीप्रज्ञा, एव, तर्हि, कात्यायनी, अथ, ह, याज्ञवल्क्यः, अन्यत्, वृत्तम्, उपाकरिष्यन् ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
अथ	कहते हैं कि	कात्यायनी	और कात्यायनी
ह	निश्चय करके	स्त्रीप्रज्ञा	स्त्रीप्रज्ञा यानी गृहस्थ धर्मिणी
याज्ञवल्क्यस्य	याज्ञवल्क्य के	बभूव	थी
द्वे	दो	अथ ह	और जब
भार्ये	स्त्रियां	याज्ञवल्क्यः	याज्ञवल्क्य
बभूवतुः	थीं	अन्यत्	दूसरे
तयोः	उनमें से	वृत्तम्	आश्रम यानी संन्यास को
मैत्रेयी	एक मैत्रेयी	उपाकरिष्यन्	धारण करने की इच्छावाले
च	और	+ आसीत्	हुये
कात्यायनी	दूसरी कात्यायनी		
मैत्रेयी	मैत्रेयी		
ब्रह्मवादिनी	ब्रह्मवादिनी		

भावार्थ ।

लोग कहते हैं कि, याज्ञवल्क्य महाराज के दो स्त्रियां थीं, उनमें से एक मैत्रेयी थी, दूसरी कात्यायनी थी, मैत्रेयी ब्रह्मवादिनी थी, और

कात्यायनी स्त्रीप्रज्ञा यानी गृहस्थधर्मिणी थी, जब याज्ञवल्क्य महाराज ने गृहस्थाश्रम को त्याग कर संन्यास लेने का विचार किया ॥ १ ॥

मन्त्रः २

मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥

पदच्छेदः ।

मैत्रेयि, इति, ह, उवाच, याज्ञवल्क्यः, प्रव्रजिष्यन्, वा, अरे, अहम्, अस्मात्, स्थानात्, अस्मि, हन्त, ते, अनया, कात्यायन्या, अन्तम्, करवाणि, इति ॥

अन्वयः	पदार्थाः
ह	तब
मैत्रेयि	हे मैत्रेयि !
इति	ऐसा
+ सम्बोध्य	सम्बोधन करके
याज्ञवल्क्यः	याज्ञवल्क्य
उवाच	बोले कि
अरे	अरे मैत्रेयि !
अहम्	मैं
अस्मात्	इस
स्थानात्	गृहस्थाश्रम से
प्रव्रजिष्यन्	गमन करनेवाला
अस्मि	हूं
हन्त	यदि तुम्हारी इच्छा हो तो
अनया	इस
कात्यायन्या	कात्यायनी के साथ
ते	तुम्हारे
अन्तम्	धनविभाग को
करवाणि इति	पृथक् करदूं

भावार्थ ।

तब मैत्रेयी को सम्बोधन करके कहा कि अरे मैत्रेयि ! मैं इस गृहस्थाश्रम से गमन करनेवाला हूं, यदि तुम्हारी इच्छा हो तो इस कात्यायनी के साथ तुम्हारे धन के भाग को पृथक् कर दूं ॥ २ ॥

मन्त्रः ३

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताऽहो३ नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥

पदच्छेदः ।

सा, ह, उवाच, मैत्रेयी, यत्, नु, मे इयम्, भगोः, सर्वा, पृथिवी, वित्तेन, पूर्णा, स्यात्, स्याम्, नु, अहम्, तेन, अमृता, आहो, न, इति, न, इति, ह, उवाच, याज्ञवल्क्यः, यथा, एव, उपकरणवताम्, जीवितम्, तथा, एव, ते, जीवितम्, स्यात्, अमृतत्वस्य, तु, न, आशा, अस्ति, वित्तेन, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
ह	तब	उवाच	कहा कि
मैत्रेयी	मैत्रेयी	इति	ऐसा
उवाच	बोली कि	न	नहीं होसक्ता है
यत् नु	यदि	यथा	जैसे
भगोः	हे भगवन् !	उपकरणवताम्	धनाढ्य का
इयम्	यह	जीवितम्	जीवन
सर्वा	सब	भवति	होता है
पृथिवी	पृथिवी	तथैव	उसी प्रकार
वित्तेन	धन धान्यादि करके	ते	तुम्हारा भी
पूर्णा	पूरित होती हुई	जीवितम्	जीवन
मे	मेरे ही	स्यात्	होगा
स्यात्	होजाय तो	तु	मगर
तेन	उस करके	अमृतत्वस्य	मुक्ति की
+ अहम्	मैं	आशा	आशा
कथम्	किसी तरह	वित्तेन	धन करके
अमृता	मुक्त	न	नहीं
स्याम्	होजाऊंगी	अस्ति	होसक्ती है
+ इति श्रुत्वा	ऐसा सुनकर		
याज्ञवल्क्यः	याज्ञवल्क्य ने		

भावार्थ ।

यह सुनकर मैत्रेयी बोली कि, हे भगवन् ! आप कृपा करके बतावें कि यदि सब पृथिवी धन धान्यादि करके पूरित होती हुई मेरेही हो जाय तो क्या उस करके मैं मुक्त हो जाऊंगी ? यह सुनकर याज्ञवल्क्य

महाराज ने कहा कि तुम धन आदि के पाने से मुक्त नहीं हो सक्ती हो, हां जैसे धनाढ्यादि अपना जीवन करते हैं उसी प्रकार तुम्हारा भी जीवन होगा परन्तु मुक्ति की आशा धन करके नहीं होसक्ती है ॥ ३ ॥

मन्त्रः ४

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥

पदच्छेदः ।

सा, ह, उवाच, मैत्रेयी, येन, अहम्, न, अमृता, स्याम्, किम्, अहम्, तेन, कुर्याम्, यत्, एव, भगवान्, वेद, तत्, एव, मे, ब्रूहि, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
ह	तब	अहम्	मैं
सा	वह	किम्	क्या
मैत्रेयी	मैत्रेयी	कुर्याम्	करूंगी
उवाच	बोली कि	भगवान्	आप
येन	जिस धन से	यत्	जिस वस्तु को
अहम्	मैं	एव	भली प्रकार
अमृता	मुक्त	वेद	जानते हैं
न	नहीं	तत् एव	उसही को
स्याम्	होसक्ती हूं	मे	मेरे लिये
तेन	उस धन को	ब्रूहि इति	उपदेश करें

भावार्थ ।

उस पर मैत्रेयी बोली कि जब धन करके मुक्त नहीं होसक्ती हूं तो उस धन को मैं क्या करूंगी, हे प्रभो ! जिस वस्तु को आप भली प्रकार जानते हैं उसी को मेरे लिये उपदेश करें ॥ ४ ॥

मन्त्रः ५

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥

पदच्छेदः।

सः, ह, उवाच, याज्ञवल्क्यः, प्रिया, वै, खलु, नः, भवती, सती, प्रियम्, अवृधत्, हन्त, तर्हि, भवति, एतत्, व्याख्यास्यामि, ते, व्याचक्षाणस्य, तु, मे, निदिध्यासस्व, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
ह=तब		भवति=हे मैत्रेयि !	
याज्ञवल्क्यः=याज्ञवल्क्य		ते=तुम्हारे लिये	
उवाच वै=बोले कि		एतत्=इस मोक्ष को	
भवती=तू		व्याख्यास्यामि=मैं कहूंगा	
नः=मेरी बड़ी		तु=लेकिन	
प्रिया=प्यारी		व्याचक्षाणस्य=बयान करते हुये	
सती=होकर		मे=मेरे	
प्रियम्=प्रिय कोही		निदिध्यासस्व इति=बातों के मतलब पर ध्यान रक्खो	
अवृधत्=चाहती है			
हन्त तर्हि=अच्छा तो			

भावार्थ।

यह सुनकर याज्ञवल्क्य महाराज बोले कि, हे मैत्रेयि ! तू पहिले भी मुझको अतिप्रिय थी और अब भी तू अतिप्यारी है और प्रिय वस्तु को चाहनेवाली है, हे मैत्रेयि ! मैं तुम्हारे लिये इस मोक्षमार्ग को बड़ी खुशी से कहूंगा तुम मेरे वचनों को खूब ध्यान देकर सुनो ॥ ५ ॥

मन्त्रः ६

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति । न वा अरे

ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्यात्मनस्तु कामाय वेदाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥

पदच्छेदः ।

सः, ह, उवाच, न, वा, अरे, पत्युः, कामाय, पतिः, प्रियः, भवति, आत्मनः, तु, कामाय, पतिः, प्रियः, भवति, न, वा, अरे, जायायै, कामाय, जाया, प्रिया, भवति, आत्मनः, तु, कामाय, जाया, प्रिया, भवति, न, वा, अरे, पुत्राणाम्, कामाय, पुत्राः, प्रियाः, भवन्ति, आत्मनः, तु, कामाय, पुत्राः, प्रियाः, भवन्ति, न, वा, अरे, वित्तस्य, कामाय, वित्तम्, प्रियम्, भवति, आत्मनः, तु, कामाय, वित्तम्, प्रियम्, भवति, न, वा, अरे, पशूनाम्, कामाय, पशवः, प्रियाः, भवन्ति, आत्मनः, तु, कामाय, पशवः, प्रियाः, भवन्ति, न, वा, अरे, ब्रह्मणः, कामाय, ब्रह्म, प्रियम्, भवति, आत्मनः, तु, कामाय, ब्रह्म, प्रियम्, भवति, न, वा, अरे, क्षत्रस्य, कामाय, क्षत्रम्, प्रियम्, भवति, आत्मनः, तु, कामाय, क्षत्रम्, प्रियम्, भवति, न, वा, अरे, लोकानाम्, कामाय, लोकाः, प्रियाः, भवन्ति, आत्मनः, तु, कामाय, लोकाः, प्रियाः, भवन्ति, न, वा, अरे, देवानाम्, कामाय, देवाः, प्रियाः, भवन्ति, आत्मनः, तु, कामाय, देवाः, प्रियाः, भवन्ति, न, वा, अरे, वेदानाम्,

कामाय, वेदाः, प्रियाः, भवन्ति, आत्मनः, तु, कामाय, वेदाः, प्रियाः, भवन्ति, न, वा, अरे, भूतानाम्, कामाय, भूतानि, प्रियाणि, भवन्ति, आत्मनः, तु, कामाय, भूतानि, प्रियाणि, भवन्ति, न वा, अरे, सर्वस्य, कामाय, सर्वम्, प्रियम्, भवति, आत्मनः, तु, कामाय, सर्वम्, प्रियम्, भवति, आत्मा, वा, अरे, द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः, मैत्रेयि, आत्मनि, खलु, अरे, दृष्टे, श्रुते, मते, विज्ञाते, इदम्, सर्वम्, विदितम् ॥

अन्वयः पदार्थाः

ह=प्रसिद्ध
सः=वह याज्ञवल्क्य
उवाच=कहते भये कि
अरे=हे मैत्रेयि !
पत्युः=पति की
कामाय=कामना के लिये
+भार्याम्=भार्या को
पतिः=पति
प्रियः=प्यारा
न=नहीं
भवति=होता है
तु=परन्तु
आत्मनः=अपने जीवात्मा की
कामाय=कामना के लिये
पतिः=पति
+भार्याम्=भार्या को
प्रियः=प्यारा
भवति=होता है
अरे=हे मैत्रेयि !
जायायै=पत्नी की
कामाय=कामना के लिये
जाया=पत्नी

अन्वयः पदार्थाः

प्रिया=पति को प्यारी
न=नहीं
भवति=होती है
तु=परन्तु
आत्मनः=अपने जीवात्मा की
कामाय=कामना के लिये
जाया=पत्नी
प्रिया=पति को प्यारी
भवति=होती है
अरे=हे मैत्रेयि !
पुत्राणाम्=लड़कों के
कामाय=मतलब के लिये
पुत्राः=लड़के
प्रियाः=माता पिता को प्यारे
न=नहीं
भवन्ति=होते हैं
तु=परन्तु
आत्मनः=अपने
कामाय=मतलब के लिये
पुत्राः=लड़के
प्रियाः=माता पिता को प्यारे
भवन्ति=होते हैं

अरे=हे मैत्रेयि !
वित्तस्य=धन के
कामाय=अर्थ
वित्तम्=धनी को धन
प्रियम्=प्यारा
वै न=नहीं
भवति=होता है
तु=परन्तु
आत्मनः=अपने जीवात्मा की
कामाय=कामना के लिये
वित्तम्=धन
प्रियम्=प्यारा
भवति=होता है
अरे=हे मैत्रेयि !
ब्रह्मणः=ब्राह्मण के
कामाय=मतलब के लिये
ब्रह्म=ब्राह्मण
प्रियम्=लोगों को प्यारा
वै न=नहीं
भवति=होता है
तु=परन्तु
आत्मनः=अपने जीवात्मा के
कामाय=मतलब के लिये
ब्रह्म=ब्राह्मण
प्रियम्=प्यारा
भवति=होता है
अरे=हे मैत्रेयि !
क्षत्रस्य=क्षत्रिय के
कामाय=मतलब के लिये
क्षत्रम्=क्षत्रिय
प्रियम्=लोगों को प्यारा
न=नहीं
भवति=होता है
तु=परन्तु
आत्मनः=अपने जीवात्मा के
कामाय=मतलब के लिये
क्षत्रम्=क्षत्रिय
प्रियम्=प्यारा
भवति=होता है
अरे=हे मैत्रेयि !
लोकानाम्=लोकों के
कामाय=मतलब के लिये
लोकाः=लोक
प्रियाः=प्यारे
न वै=नहीं
भवन्ति=होते हैं
तु=परन्तु
आत्मनः=अपने जीवात्मा के
कामाय=मतलब के लिये
लोकाः=लोक
प्रियाः=प्यारे
भवन्ति=होते हैं
अरे=हे मैत्रेयि !
देवानाम्=देवताओं के
कामाय=मतलब के लिये
देवाः=देवता
प्रियाः=लोगों को प्यारे
न वै=नहीं
भवन्ति=होते हैं
तु=परन्तु
आत्मनः=अपने जीवात्मा के
कामाय=मतलब के लिये
देवाः=देवता
प्रियाः=प्यारे

भवन्ति=होते हैं
अरे=हे मैत्रेयि !
भूतानाम्=प्राणियों के
कामाय=मतलब के लिये
भूतानि=और प्राणी
प्रियाणि=प्रिय
न वै=नहीं
भवन्ति=होते हैं
तु=परन्तु
आत्मनः=अपने जीवात्मा की
कामाय=कामना के लिये
भूतानि=प्राणी
प्रियाणि=प्यारे
भवन्ति=होते हैं
अरे=हे मैत्रेयि !
सर्वस्य=सब के
कामाय=मतलब के लिये
सर्वम्=सब
प्रियम्=प्यारे
न वै=नहीं
भवन्ति=होते हैं
तु=परन्तु
आत्मनः=अपने जीवात्मा के
कामाय=मतलब के लिये
सर्वम्=सब
प्रियम्=प्यारे
भवति=होते हैं
अरे=हे मैत्रेयि !
आत्मा=वह अपना जीवात्मा
द्रष्टव्यः=देखने योग्य है
मन्तव्यः=मनन के योग्य है
श्रोतव्यः=सुनने के योग्य है
निदिध्यासितव्यः=ध्यान के योग्य है
अरे मैत्रेयि=हे मैत्रेयि !
आत्मनि=जीवात्मा के
दृष्टे=देखे जाने पर
श्रुते=सुने जाने पर
मते=मनन किये जाने पर
विज्ञाते=जाने जाने पर
इदम्=यह
सर्वम्=सारा ब्रह्माण्ड
विदितम्=मालूम
+ भवति=होजाता है

भावार्थ ।

याज्ञवल्क्य महाराज कहते हैं कि, हे मैत्रेयि ! पति की कामना के लिये भार्या को पति प्यारा नहीं होता है परन्तु निज जीवात्मा की कामना के लिये पति भार्या को प्यारा होता है, हे मैत्रेयि ! पत्नी की कामना के लिये पत्नी पति को प्यारी नहीं होती है परन्तु अपने जीवात्मा की कामना के लिये पत्नी पति को प्यारी होती है, हे मैत्रेयि ! लड़कों की कामना के लिये लड़के माता पिता को प्यारे नहीं होते हैं परन्तु अपने जीवात्मा के लिये लड़के माता पिता को प्यारे होते हैं,

हे मैत्रेयि ! धनके अर्थ धनी को धन प्यारा नहीं होता है, परन्तु अपने जीवात्मा की कामना के लिये धन धनी को प्यारा होता है, हे मैत्रेयि ! ब्राह्मण की कामना के लिये लोगों को ब्राह्मण प्यारा नहीं होता है, परन्तु अपने जीवात्मा की कामना के लिये ब्राह्मण लोगों को प्यारा होता है, हे मैत्रेयि ! क्षत्रिय की कामना के लिये क्षत्रिय लोगों को प्यारा नहीं होता है परन्तु अपने जीवात्मा के लिये लोगों को क्षत्रिय प्यारा होता है, लोकों की कामना के लिये लोक प्रिय. नहीं होते हैं परन्तु अपने जीवात्मा के लिये लोगों को लोक प्यारे होते हैं, हे मैत्रेयि ! देवताओं की कामना के लिये लोगों को देवता प्यारे नहीं होते हैं, परन्तु अपने जीवात्मा के लिये देवता लोगों को प्यारे होते हैं, हे मैत्रेयि ! प्राणियों की कामना के लिये प्राणी प्यारे नहीं होते हैं परन्तु अपने जीवात्मा की कामना के लिये लोगों को प्राणी प्रिय होते हैं, हे मैत्रेयि ! सबकी कामना के लिये सबको सब प्यारे नहीं होते हैं परन्तु अपने जीवात्मा की कामना के लिये सबको सब प्यारे होते हैं, अरे हे मैत्रेयि ! यही अपना जीवात्मा देखने योग्य है, मनन करने योग्य है, श्रवण करने योग्य है, ध्यान करने योग्य है, हे मैत्रेयि ! जीवात्मा के देखे जाने पर, सुने जाने पर, मनन किये जाने पर यह सारा ब्रह्माण्ड मालूम होजाता है ॥ ६ ॥

मन्त्रः ७

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्योऽन्यत्रात्मनो वेदान्वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥

पदच्छेदः ।

ब्रह्म, तम्, परादात्, यः, अन्यत्र, आत्मनः, ब्रह्म, वेद, क्षत्रम्, तं, परादात्, यः, अन्यत्र, आत्मनः, क्षत्रम्, वेद, लोकाः, तम्, परादुः, यः, अन्यत्र, आत्मनः, लोकान्, वेद, देवाः, तम्, परादुः, यः, अन्यत्र, आत्मनः, देवान्, वेद, वेदाः, तम्, परादुः, यः, अन्यत्र, आत्मनः, वेदान्, वेद, भूतानि, तम्, परादुः, यः, अन्यत्र, आत्मनः, भूतानि, वेद, सर्वम्, तम्, परादात्, यः, अन्यत्र, आत्मनः, सर्वम्, वेद, इदम्, ब्रह्म, इदम्, क्षत्रम्, इमे, लोकाः, इमे, देवाः, इमे, वेदाः, इमानि, भूतानि, इदम्, सर्वम्, यत्, अयम्, आत्मा ॥

अन्वयः	पदार्थाः
अरे	हे मैत्रेयि !
ब्रह्म	ब्राह्मण जाति
तम्	उस पुरुष को
परादात्	त्याग देती है
यः	जो
आत्मनः	अपने जीवात्मा से
अन्यत्र	पृथक्
ब्रह्म	ब्राह्मण को
वेद	जानता है
क्षत्रम्	क्षत्रिय जाति
तम्	उस पुरुष को
परादात्	त्याग देती है
यः	जो
आत्मनः	अपने जीवात्मा से
अन्यत्र	पृथक्
क्षत्रम्	क्षत्रियत्व को
वेद	जानता है
लोकाः	स्वर्गादिलोक
तम्	उस पुरुष को
परादुः	त्याग देते हैं
यः	जो
आत्मनः	अपने जीवात्मा से
अन्यत्र	पृथक्
लोकान्	स्वर्गादिलोकों को
वेद	जानता है
देवाः	देवता
तम्	उसको
परादुः	त्याग देते हैं
यः	जो
आत्मनः	अपने जीवात्मा से
अन्यत्र	पृथक्
देवान्	देवताओं को
वेद	जानता है
वेदाः	वेद
तम्	उसको
परादुः	त्याग देते हैं
यः	जो
आत्मनः	अपने जीवात्मा से
अन्यत्र	पृथक्
वेदान्	वेदों को

वेद=जानता है	इदम्=यह
भूतानि=प्राणी	ब्रह्म=ब्राह्मण
तम्=उसको	इदम्=यह
पराडुः=त्याग देते हैं	क्षत्रम्=क्षत्रिय
यः=जो	इमे=ये
आत्मनः=अपने जीवात्मा से	लोकाः=लोक
अन्यत्र=पृथक्	इमे=ये
भूतानि=प्राणियों को	देवाः=देव
वेद=जानता है	इमे=ये
सर्वम्=सब	वेदाः=वेद
तम्=उसको	इमानि=ये
परादात्=त्याग देते हैं	भूतानि=सब प्राणी
यः=जो	इदम्=यह
आत्मनः=अपने जीवात्मा से	यत्=जो कुछ है
अन्यत्र=पृथक्	अयम्=यही
सर्वम्=सब को	सर्वम्=सब
वेद=जानता है	आत्मा=आत्मा है

भावार्थ ।

याज्ञवल्क्य महाराज कहते हैं कि, हे प्रिय मैत्रेयि ! ब्रह्मत्व शक्ति उस पुरुष को त्याग देती है जो ब्रह्मत्व को अपने आत्मा से पृथक् जानता है, क्षत्रियत्व शक्ति उस पुरुष को त्याग देती है जो अपने आत्मा से क्षत्रियत्व को पृथक् समझता है, स्वर्गादिलोक उस पुरुष को त्याग देते हैं जो अपने आत्मा से स्वर्गादिलोकों को पृथक् जानता है, देवता उस पुरुष को त्याग देते हैं जो अपने आत्मा से देवता को पृथक् जानता है, वेद उस पुरुष को त्याग देते हैं जो वेदों को अपने आत्मा से पृथक् जानता है, सब प्राणी उस पुरुष को त्याग देते हैं जो अपने आत्मा से प्राणियों को पृथक् जानता है, सब कोई उस पुरुष को त्याग देते हैं जो अपने आत्मा से सबको पृथक् जानता है यह ब्राह्मण है; यह क्षत्रिय है, यह लोक है, यह देवता है, यह वेद है,

यह प्राणी है, जो कुछ है वह सब अपना आत्मा है आत्मा से अति-रिक्त कुछ भी नहीं है ॥ ७ ॥

मन्त्रः ८

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥

पदच्छेदः ।

सः, यथा, दुन्दुभेः, हन्यमानस्य, न, बाह्यान्, शब्दान्, शक्नुयात्, ग्रहणाय, दुन्दुभेः, तुः, ग्रहणेन, दुन्दुभ्याघातस्य, वा, शब्दः, गृहीतः ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
यथा	जैसे	तु	परन्तु
हन्यमानस्य	बजते हुये	दुन्दुभेः ग्रहणेन	ढोल के पकड़लेने से
दुन्दुभेः	ढोल के	वा	अथवा
बाह्यान्	बाहर निकले हुये	दुन्दुभ्याघातस्य	ढोल के बजानेवाले को पकड़ लेने से
शब्दान्	शब्दों के	शब्दः	शब्द का ग्रहण
ग्रहणाय	ग्रहण यानी पकड़ने के लिये	भवति	होता है
+ जनः	कोई पुरुष	+ तथा	वैसेही
न	नहीं	+ सः	वह आत्मा
शक्नुयात्	समर्थ होसक्ता है	गृहीतः	ग्रहण किया जाता है

भावार्थ ।

हे मैत्रेयि ! जैसे बजते हुये ढोल के शब्द को कोई पकड़ नहीं सक्ता है यानी बन्द नहीं कर सक्ता है परन्तु ढोल के पकड़ लेने से अथवा ढोल के बजानेवाले को पकड़ लेने से शब्द का ग्रहण होजाता है यानी बन्द होजाता है उसी प्रकार यह अपना आत्मा जो इस शरीर विषे स्थित है उसका ग्रहण जभी होसक्ता है जब शरीर आत्मा से पृथक् जान लिया जाय या शरीर का चलानेवाला जीवात्मा शरीर से पृथक् जान लिया जाय ॥ ८ ॥

मन्त्रः ९

स यथा शंखस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शंखस्यतु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥

पदच्छेदः ।

सः, यथा, शंखस्य, ध्मायमानस्य, न, बाह्यान्, शब्दान्, शक्नुयात्, ग्रहणाय, शंखस्य, तु, ग्रहणेन, शंखध्मस्य, वा, शब्दः, गृहीतः ॥

अन्वयः	पदार्थाः
यथा	जैसे
ध्मायमानस्य	बजाये हुये
शंखस्य	शंख के
बाह्यान्	बाहर निकले हुये
शब्दान्	शब्दों के
ग्रहणाय	पकड़ने के लिये
+ जनः	कोई पुरुष
न	नहीं
शक्नुयात्	समर्थ होसक्ता है
तु	परन्तु
शंखस्य	शंख के
ग्रहणेन	ग्रहण करने से
वा	अथवा
शंखध्मस्य	शंख के बजानेवाले के
ग्रहणेन	पकड़ लेने से
शब्दः	शब्द का
गृहीतः	ग्रहण होजाता है
+ तथैव	इसी प्रकार
+ सः	वह आत्मा
+ गृहीतः	ग्रहण
+ भवति	होजाता है

भावार्थ ।

हे मैत्रेयि ! जैसे बजाये हुये शंख के बाहर निकले हुये शब्दों के पकड़ने के लिये कोई पुरुष समर्थ नहीं होता है परन्तु जब शंख को पकड़ लेता है या शंख के बजानेवाले को पकड़लेता है तब शब्द को जो उसके अन्दर स्थित है पकड़ लेता है इसी प्रकार इस जीवात्मा का ग्रहण अभी होसक्ता है जब शरीर से पृथक् करके देखा जाता है या शरीर इससे पृथक् करके देखा जाता है ॥ ९ ॥

मन्त्रः १०

स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥

पदच्छेदः ।

सः, यथा, वीणायै, वाद्यमानायै, न, बाह्यान्, शब्दान्, शक्नुयात्, ग्रहणाय, वीणायै, तु, ग्रहणेन, वीणावादस्य, वा, शब्दः, गृहीतः ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
यथा	जैसे	वीणायै	वीणा के
वाद्यमानायै	बजाई हुई	ग्रहणेन	ग्रहण करने से
वीणायै	वीणा के	वा	अथवा
बाह्यान्	बाहर निकले हुये	वीणावादस्य	वीणा के बजानेवालेके
शब्दान्	शब्दों के	ग्रहणेन	पकड़ लेने से
ग्रहणाय	ग्रहण करने के लिये	शब्दः गृहीतः	शब्द ग्रहण होजाताहै
जनः	कोई पुरुष	+ तथैव	उसी तरह
न	नहीं	+ सः	वह आत्मा
शक्नुयात्	समर्थ होसक्ता है	+ गृहीतः	ग्रहण
तु	परन्तु	+ भवति	होजाता है

भावार्थ ।

हे मैत्रेयि ! जैसे वीणा से बाहर निकले शब्द पकड़े नहीं जा सकते हैं परन्तु वीणा के पकड़ लेने से या वीणा के बजाने वाले के पकड़ लेने से शब्द का ग्रहण होजाता है उसी तरह शरीर से आत्मा को पृथक् करके और आत्मा से शरीर को पृथक् करने से आत्मा का ग्रहण होता है ॥ १० ॥

मन्त्रः ११

स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानि ॥

पदच्छेदः ।

सः, यथा, आर्द्रैधाग्नेः, अभ्याहितस्य, पृथक्, धूमाः, विनिश्च-

रन्ति, एवम्, वा, अरे, अस्य, महतः, भूतस्य, निश्वसितम्, एतत्, यत्, ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्वाङ्गिरसः, इतिहासः, पुराणम्, विद्या, उपनिषदः, श्लोकाः, सूत्राणि, अनुव्याख्यानानि, व्याख्यानानि, इष्टम्, हुतम्, आशितम्, पायितम्, अयम्, च, लोकः, परः, च, लोकः, सर्वाणि, च, भूतानि, अस्य, एव, एतानि, सर्वाणि, निश्वसितानि ॥

अन्वयः	पदार्थाः
यथा	जैसे
अभ्याहितस्य	स्थापित की हुई
आर्द्रैधाग्नेः	गीली लकड़ी की अग्नि में से
धूमाः	धूमावली
पृथक्	पृथक् पृथक्
विनिश्चरन्ति	चारों तरफ फैलती हैं
एवम्	इसी प्रकार
अरे	हे मैत्रेयि !
वा	निश्चय करके
महतः	गुणोंमें सबसे बड़ा और स्वरूप में अति सूक्ष्म
अस्य	इस
भूतस्य	जीवात्मा का
एतत्	यह
निश्वसितम्	श्वास है
यत्	जो
ऋग्वेदः	ऋग्वेद
यजुर्वेदः	यजुर्वेद
सामवेदः	सामवेद
अथर्वाङ्गिरसः	अथर्वण वेद
इतिहासः	इतिहास

अन्वयः	पदार्थाः
पुराणम्	पुराण
विद्या	ज्ञानविद्या
उपनिषदः	उपनिषद्
श्लोकाः	मन्त्र
सूत्राणि	सूत्र
अनुव्याख्यानानि	भाष्य
व्याख्यानानि	व्याख्यान
इष्टम्	यज्ञ
हुतम्	होम
आशितम्	अन्नदान
पायितम्	जलदान
अयम् च	यह
लोकः	लोक
परः च	पर
लोकः	लोक
सर्वाणि	सब
च	और
एतानि	ये
सर्वाणि	सब
भूतानि	प्राणी
अस्य एव	इसी जीवात्मा के
निश्वसितानि	स्वाभाविक श्वास हैं

भावार्थ ।

हे मैत्रेयि ! जैसे अग्नि में गीली लकड़ी के डालने से धूम और चिन्गारी आदिक चारों तरफ फैलती हैं उसी प्रकार हे मैत्रेयि ! गुणों में सबसे बड़ा और स्वरूप में सबसे अति सूक्ष्म जीवात्मा का ऋग्वेद, यजुर्वेद, सामवेद, अथर्वणवेद, इतिहास, पुराण, गानविद्या, आत्मविद्या, मन्त्र, सूत्र, भाष्य, व्याख्यान, होम, अन्नदान, जलदान, यह लोक, परलोक और सब प्राणी स्वाभाविक श्वास हैं ॥ ११ ॥

मन्त्रः १२

स यथा सर्वासामपाᳩ समुद्र एकायनमेवᳩ सर्वेषाᳩ स्पर्शानां त्वगेकायनमेवᳩ सर्वेषां गन्धानां नासिके एकायनमेवᳩ सर्वेषाᳩ रसानां जिह्वैकायनमेवᳩ सर्वेषाᳩ रूपाणां चक्षुरेकायनमेवᳩ सर्वेषाᳩ शब्दानाᳩ श्रोत्रमेकायनमेवᳩ सर्वेषाᳩ संकल्पानां मन एकायनमेवᳩ सर्वासां विद्यानाᳩ हृदयमेकायनमेवᳩ सर्वेषां कर्मणाᳩ हस्तावेकायनमेवᳩ सर्वेषामानन्दानामुपस्थ एकायनमेवᳩ सर्वेषां विसर्गाणां पायुरेकायनमेवᳩ सर्वेषामध्वनां पादावेकायनमेवᳩ सर्वेषां वेदानां वागेकायनम् ॥

पदच्छेदः ।

सः, यथा, सर्वासाम्, अपाम्, समुद्रः, एकायनम्, एवम्, सर्वेषाम्, स्पर्शानाम्, त्वक्, एकायनम्, एवम्, सर्वेषाम्, गन्धानाम्, नासिके, एकायनम्, एवम्, सर्वेषाम्, रसानाम्, जिह्वा, एकायनम्, एवम्, सर्वेषाम्, रूपाणाम्, चक्षुः, एकायनम्, एवम्, सर्वेषाम्, शब्दानाम्, श्रोत्रम्, एकायनम्, एवम्, सर्वेषाम्, संकल्पानाम्, मनः, एकायनम्, एवम्, सर्वासाम्, विद्यानाम्, हृदयम्, एकायनम्, एवम्, सर्वेषाम्, कर्मणाम्, हस्तौ, एकायनम्, एवम्, सर्वेषाम्, आनन्दानाम्, उपस्थः, एकायनम्, एवम्, सर्वेषाम्, विसर्गाणाम्, पायुः, एकायनम्,

एवम्, सर्वेषाम्, अध्वनाम्, पादौ, एकायनम्, एवम्, सर्वेषाम्, वेदानाम्, वाग्, एकायनम् ॥

अन्वयः	पदार्थाः
यथा=जैसे	
सर्वासाम्=सब	
अपाम्=जलों का	
एकायनम्=एक स्थान	
समुद्रः=समुद्र है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
स्पर्शानाम्=स्पर्शों का	
एकायनम्=एक स्थान	
त्वक्=त्वचा है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
गन्धानाम्=गन्धों का	
एकायनम्=एक स्थान	
नासिके=घ्राणेन्द्रिय है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
रसानाम्=स्वादों का	
एकायनम्=एक स्थान	
जिह्वा=जिह्वा है	
एवम्=इसी प्रकार	
सर्वेषाम्=सब	
रूपाणाम्=रूपों का	
एकायनम्=एक स्थान	
चक्षुः=आंख है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
शब्दानाम्=शब्दों का	

अन्वयः	पदार्थाः
एकायनम्=एक स्थान	
श्रोत्रम्=श्रोत्र है	
एवम्=इसी प्रकार	
सर्वेषाम्=सब	
संकल्पानाम्=संकल्पों का	
एकायनम्=एक स्थान	
मनः=मन है	
एवम्=इसी तरह	
सर्वासाम्=सब	
विद्यानाम्=विद्याओं का	
एकायनम्=एक स्थान	
हृदयम्=हृदय है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
कर्मणाम्=कर्मों का	
एकायनम्=एक स्थान	
हस्तौ=हाथ हैं	
एवम्=इसी तरह	
सर्वेषाम्=सब	
आनन्दानाम्=आनन्दों का	
एकायनम्=एक स्थान	
उपस्थः=उपस्थ है	
एवम्=इसी तरह	
सर्वेषाम्=सब	
विसर्गाणाम्=विसर्जनों का	
एकायनम्=एक स्थान	
पायुः=गुदा है	
एवम्=इसी प्रकार	

सर्वेषाम्=सब	एकायनम्=एक स्थान
अध्वनाम्=मार्गों का	वाक्=वाणी है
एकायनम्=एक स्थान	+ तथा एव=तिसी प्रकार
पादौ=पाद हैं	+ सः=वह आत्मा
एवम्=इसी तरह	+ सर्वेषाम्=सब
सर्वेषाम्=सब	+ ज्ञानानाम्=ज्ञानों का
वेदानाम्=वेदों का	+ एकायनम्=एक स्थान है

भावार्थ ।

हे मैत्रेयि ! जैसे सब जलों का एक स्थान समुद्र है, जैसे सब स्पर्शों का एक स्थान त्वचा है, जैसे सब गन्धों का एक स्थान घ्राण इन्द्रिय है, जैसे सब स्वादों का एक स्थान जिह्वा है, जैसे सब रूपों का एक स्थान नेत्र है, जैसे सब शब्दों का एक स्थान श्रोत्र है, जैसे सब संकल्पों का एक स्थान मन है, जैसे सब विद्याओं का एक स्थान हृदय है, जैसे सब कर्मों का एक स्थान हस्त है, जैसे सब आनन्दों का एक स्थान उपस्थ है, जैसे सब विसर्जनों का एक स्थान गुदा है, जैसे सब मार्गों का एक स्थान पाद है, जैसे सब वेदों का एक स्थान वाणी है, इसी प्रकार यह अपना आत्मा सब ज्ञानों का एक स्थान है ॥ १२ ॥

मन्त्रः १३

स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥

पदच्छेदः ।

सः, यथा, सैन्धवघनः, अनन्तरः, अबाह्यः, कृत्स्नः, रसघनः, एव, एवम्, वा, अरे, अयम्, आत्मा, अनन्तरः, अबाह्यः, कृत्स्नः, प्रज्ञानघनः, एव, एतेभ्यः, भूतेभ्यः, समुत्थाय, तानि, एव, अनुविनश्यति, न, प्रेत्य, संज्ञा, अस्ति, इति, अरे, ब्रवीमि, इति, ह, उवाच, याज्ञवल्क्यः ॥

अन्वयः	पदार्थाः
यथा	जैसे
सः	वह
सैन्धवघनः	सैन्धवनोन का डला
अनन्तरः	भीतर
अवाह्यः	वाहर से
रसघनः	रसवाला
कृत्स्नः	पूर्ण है
एवम् एव	इसी प्रकार
अरे	हे मैत्रेयि !
अयम्	यह
आत्मा	आत्मा
अनन्तरः	अन्दर
अवाह्यः	वाहर से
इति वा	निश्चय करके
प्रज्ञानघनः	ज्ञानस्वरूप है
+ सः	यही आत्मा
एतेभ्यः	इन
एव	ही
भूतेभ्यः	पञ्चमहाभूतों से
समुत्थाय	निकल कर
तानि	उन
एव	ही के
अनु	अभ्यन्तर
विनश्यति	लीन रहता है
अरे	हे मैत्रेयि !
ब्रवीमि	मैं सत्य कहता हूं
प्रेत्य	देह छोड़ने के पीछे
अस्य	इस आत्मा की
संज्ञा	विशेष संज्ञा
न	नहीं
अस्ति	रहती है
इति	ऐसा
याज्ञवल्क्यः उवाच ह	याज्ञवल्क्य ने कहा

भावार्थ ।

हे मैत्रेयि ! जैसे सैन्धवनोन का डला भीतर वाहर रस करके पूर्ण है, उसी प्रकार यह जीवात्मा वाहर भीतर से सत् चित् आनन्द करके पूर्ण है, यह आत्मा इन्हीं पञ्चतत्त्वों में से प्रकट होकर इन्हीं के अभ्यन्तर लय होजाता है, हे मैत्रेयि ! मैं सत्य कहता हूं देहत्याग के पीछे इस आत्मा की विशेष संज्ञा कुछ नहीं रहती ॥ १३ ॥

मन्त्रः १४

सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अह-मिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा ॥

पदच्छेदः ।

सा, ह, उवाच, मैत्रेयि, अत्र, एव, मा, भगवान्, मोहान्तम्, आपीपिपत्, न, वा, अहम्, इमम्, विजानामि, इति, सः, ह, उवाच, न, वा, अरे, अहम्, मोहम्, ब्रवीमि, अविनाशी, वा, अरे, अयम्, आत्मा, अनुच्छित्तिधर्मा ॥

अन्वयः	पदार्थाः
ह	तब
सा	वह मैत्रेयी
उवाच	बोली कि
भगवन्	हे भगवन् !
अत्रैव	इस विज्ञानघन आत्मा विषे
मा	मुझे
त्वम्	आपने
मोहान्तम्	मोहित
अपीपिपत्	किया है
इति	ऐसा
+ उक्त्वा	कह कर कि
अहम्	मैं
वा	निस्सन्देह
इमम्	इस आत्मा को
न	नहीं
विजानामि	जानता हूं

अन्वयः	पदार्थाः
ह	तब
सः	वह याज्ञवल्क्य
उवाच ह	बोले कि
अरे	हे मैत्रेयि !
अहम्	मैं
मोहम्	अज्ञान की बात को
न वा	नहीं
ब्रवीमि	कहता हूं
अरे	हे मैत्रेयि !
अयम्	यह
आत्मा	आत्मा
अविनाशी	विकाररहित है
वा	और
अनुच्छित्तिधर्मा	नाशरहित है यानी जो धर्मरहित है उसको कोई कैसे जान सक्ता है

भावार्थ ।

यह सुनकर मैत्रेयी कहती है कि, हे प्रभो ! आपने इस विज्ञानघन आत्मा विषे मुझको मोहित किया है ऐसा कहकर कि मैं आत्मा को नहीं जानता हूं, इस पर याज्ञवल्क्य महाराज कहते हैं, हे मैत्रेयि ! मैं तुमको मोह में नहीं डालता हूं, और न कोई अज्ञान की बात कही है, अरे मैत्रेयि ! यह अपना आत्मा विकाररहित है, और नाशरहित है, यह आत्मा बुद्धि का विषय नहीं है, जब बुद्धि का

विषय नहीं तब कैसे मैं कह सक्ता हूं कि मैं इस आत्मा को जानता हूं, अगर यह बुद्धि करके जाना जाय तो विकारवाला होजायगा, और जो विकारवाला होता है वह नाशधर्मवाला होता है, तुम अपने सन्देह को दूर करो और मेरे कहे हुये पर विचार करो ॥ १४ ॥

मन्त्रः १५

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तत्केन विजानीयात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥

इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति श्रीबृहदारण्यकोपनिषदि चतुर्थोऽध्यायः ॥ ४ ॥

पदच्छेदः ।

यत्र, हि, द्वैतम्, इव, भवति, तत्, इतरः, इतरम्, पश्यति, तत्, इतरः, इतरम्, जिघ्रति, तत्, इतरः, इतरम्, रसयते, तत्, इतरः, इतरम्, अभिवदति, तत्, इतरः, इतरम्, शृणोति, तत्, इतरः, इतरम्, मनुते, तत्, इतरः, इतरम्, स्पृशति, तत्, इतरः, इतरम्, विजानाति, यत्र, तु, अस्य, सर्वम्, आत्मा, एव, अभूत्, तत्, केन, कम्, पश्येत, तत्, केन, कम्, जिघ्रेत, तत्, केन, कम्, रसयेत्, तत्, केन, कम्, अभिवदेत्, तत्, केन, कम्, शृणुयात्, तत्, केन, कम्, मन्वीत, तत्, केन, कम्, स्पृशेत्, तत्, केन, कम्, विजानीयात्, येन, इदम्, सर्वम्, विजानाति, तत्, केन, विजानीयात्, सः, एषः, न, इति, न,

इति, आत्मा, अगृह्यः, न, हि, गृह्यते, अशीर्यः, न, हि, शीर्यते, असङ्गः, न, हि, सज्यते, असितः, न, व्यथते, न, रिष्यति, विज्ञातारम्, अरे, केन, विजानीयात्, इति, उक्तानुशासना, असि, मैत्रेयि, एतावत्, अरे, खलु, अमृतत्वम्, इति, ह, उक्त्वा, याज्ञवल्क्यः, विजहार ॥

अन्वयः पदार्थाः	अन्वयः पदार्थाः
यत्र=जहां पर	इतरः=दूसरा
द्वैतम् इव=द्वैत की तरह	इतरम्=दूसरे को
अयम्=यह आत्मा	मनुते=मानता है
भवति=आभास होता है	तत्=वहां ही
तत् हि=तहां ही	इतरः=और
इतरः=दूसरा	इतरम्=और को
इतरम्=दूसरे को	स्पृशति=स्पर्श करता है
पश्यति=देखता है	तत्=वहां ही
तत्=वहां ही	इतरः=और
इतरः=दूसरा	इतरम्=और को
इतरम्=दूसरे को	विजानाति=जानता है
जिघ्रति=सूंघता है	तु=परन्तु
तत्=वहां ही	यत्र=जहां
इतरः=दूसरा	अस्य=इस पुरुष को
इतरम्=दूसरे को	सर्वम्=सब जगत्
रसयते=स्वाद लेता है	आत्मा एव=आत्मा ही
तत्=वहां ही	अभूत्=होरहा है
इतरः=अन्य	तत्=वहां
इतरम्=अन्य से	अयम्=यह आत्मा
अभिवदति=कहता है	केन=किस करके
तत्=वहां ही	कम्=किसको
इतरः=अन्य	पश्येत्=देखे
इतरम्=अन्य का	तत्=वहां
शृणोति=सुनता है	केन=किस करके
तत्=वहां	कम्=किसको

जिघ्रेत्=सूंघे
तत्=वहां
केन=किस करके
कम्=किस का
रसयते=स्वाद लेवे
तत्=वहां
केन=किस करके
कम्=किसको
अभिवदेत्=कहे
तत्=वहां
केन=किस करके
कम्=किसको
शृणुयात्=सुने
तत्=वहां
केन=किस करके
कम्=किसको
मन्वीत=माने
तत्=वहां
केन=किस करके
कम्=किसको
स्पृशेत्=स्पर्श करे
तत्=वहां
केन=किस करके
कम्=किसको
विजानीयात्=जाने
येन=जिस करके
+ पुरुषः=पुरुष
इदम्=इस
सर्वम्=सबको
विजानीयात्=जानता है
तम्=उसको
केन=किस करके
विजानीयात्=कोई जाने
सः=वही
एषः=यही
आत्मा=आत्मा
नेति=नेति
नेति=नेति
इति=करके
अगृह्यः=अग्राह्य है
हि=क्योंकि
+ सः=वह
न=नहीं
गृह्यते=ग्रहण किया जा सक्ता है
अशीर्यः=जीर्णतारहित है
हि=क्योंकि
सः=वह
न=नहीं
शीर्यते=जीर्ण किया जा सक्ता है
असङ्गः=वह असङ्ग है
हि=क्योंकि
सः=वह
न सज्यते=किसी में आसक्त नहीं है
असितः=वह अबद्ध है
हि=क्योंकि
सः=वह
न व्यथते=पीड़ित नहीं होता है
च=और
न=न
रिष्यति=हत होता है
अरे=हे मैत्रेयि !
विज्ञातारम्=उस ज्ञानस्वरूप आत्मा को

केन=किस के द्वारा
विजानीयात्=कोई जाने
मैत्रेयि=हे मैत्रेयि ! तू
इति=इस प्रकार
उक्तानुशासना=उपदेश कीगई
असि=है
अरे=हे मैत्रेयि !
एतावत् खलु=इतना ही
अमृतत्वम्=मुक्ति है
इति ह=ऐसा
उक्त्वा=कहकर
याज्ञवल्क्यः=याज्ञवल्क्य
विजहार=विहार करते भये
यानी चले गये

भावार्थ ।

हे मैत्रेयि ! जहां पर यह आत्मा द्वैत भासता है, तहां ही दूसरा दूसरे को देखता है, दूसरा दूसरे को सूंघता है, दूसरा दूसरे का स्वाद लेता है, दूसरा दूसरे से कहता है, दूसरा दूसरे का सुनता है, दूसरा दूसरे का मनन करता है, दूसरा दूसरे का स्पर्श करता है, दूसरा दूसरे को जानता है, परन्तु जहां इस पुरुष को सब जगत् अपना आत्मा ही हो रहा है, वहां यह आत्मा किस करके किसको देखे, किस करके किसको सूंघे, किस करके किसका स्वाद लेवे, किस करके किससे कहे, किस करके किसको सुने, किस करके किसका मनन करे, किस करके किसको स्पर्श करे, किस करके किसको जाने, जिस करके यह पुरुष सबको जानता है उसको किस करके कोई जाने, वही यह आत्मा नेति नेति शब्द करके अग्राह्य है, जीर्णतारहित है, वही असङ्ग है, वही अबद्ध है, क्योंकि किसी करके वह ग्रहण नहीं किया जा सक्ता है, न जीर्ण किया जा सक्ता है, न वह किसीमें आसक्त है, न उसको कोई पीड़ा दे सक्ता है, न वह हत हो सक्ता है, हे मैत्रेयि ! यह आत्मा ज्ञानस्वरूप है, हे मैत्रेयि ! तू इस प्रकार उपदेश कीगई है, और तू अपने स्वरूप में स्थित है, यही मुक्ति है, अब मैं जाता हूं, ऐसा कहकर याज्ञवल्क्य महाराज चल दिये ॥ १५ ॥

इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

इति श्रीबृहदारण्यकोपनिषदि भाषानुवादे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ॥

अथ प्रथमं ब्राह्मणम् ।

मन्त्रः १

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥

इति प्रथमं ब्राह्मणम् ॥ १ ॥

पदच्छेदः ।

ॐ, पूर्णम्, अदः, पूर्णम्, इदम्, पूर्णात्, पूर्णम्, उदच्यते, पूर्णस्य, पूर्णम्, आदाय, पूर्णम्, एव, अवशिष्यते, ॐ, खम्, ब्रह्म, खम्, पुराणम्, वायुरम्, खं, इति, ह, स्म, आह, कौरव्यायणीपुत्रः, वेदः, अयम्, ब्राह्मणाः, विदुः, वेद, अनेन, यत्, वेदितव्यम् ॥

अन्वयः	पदार्थाः
ॐ	ॐकाररूप
अदः	यह परोक्ष ब्रह्म
पूर्णम्	आकाशवत् पूर्ण है
इदम्	यह दृश्यमान नाम रूपात्मक जगत् भी
पूर्णम्	पूर्ण है
+ हि	क्योंकि
पूर्णात्	पूर्णकारणात्मक ब्रह्म से
+ इदम्	यह
पूर्णम्	पूर्ण जगत्रूप कार्य
उदच्यते	निकला है
+ च	और
पूर्णस्य	कार्यात्मक पूर्ण ब्रह्म-रूप जगत् की
पूर्णम्	पूर्णता को
आदाय	पृथक् करने पर
एव	केवल
पूर्णम्	प्रज्ञानघन ब्रह्मरूप
अवशिष्यते	बच रहता है
खम्	आकाश
+ एव	ही
ब्रह्म	ब्रह्म है
+ ब्रह्म + एव	ब्रह्म ही
ॐ	ॐकार है
+ तत्	सोई
खम्	आकाशरूप परमात्मा
पुराणम्	निरालम्ब है
यत्	जो कुछ
वेदितव्यम्	संसार में जानने योग्य है
+ तत्	उस को
अनेन	इस

+ ॐकारेण=ॐकार करके
वेद=पुरुष जानता है
+ अतः=इस लिये
अयम्=यह ॐकार
वेदः=वेदरूप है
+ इति=ऐसा
ब्राह्मणाः=ऋषिलोग
विदुः=जानते भये
+ परन्तु=परन्तु

कौरव्यायणी-पुत्रः } =कौरव्यायणी का पुत्र
इति=ऐसा
ह=निश्चय करके
आह स्म=कहा है कि
वायुरम्= { जितने आकाश विषे सूत्रात्मा वायु व्यापक हो रहा है
+ तत्=उसी
खम्=आकाश को
+ आह=कहते हैं

भावार्थ ।

यह परोक्ष ब्रह्म आकाशवत् व्यापक है, यही दृश्यमान नाम रूपात्मक जगत् भी है, यदि जगत् अपने अधिष्ठान चेतन ब्रह्म से अलग करके देखा जाय तो केवल प्रज्ञानघन ब्रह्महो पूर्ण बच रहता है, सोई ब्रह्म आकाशरूप है वही ॐकाररूप है, और वही आकाशरूप परमात्मा है, हे शिष्य ! जो कुछ संसार विषे जानने योग्य है वह इसी ॐकार करके जाना जाता है, इसलिये यह ॐकार वेद है, ऐसा ऋषि लोगों का अनुभव है, और कौरव्यायणी के पुत्र ने ऐसा कहा है कि जितने आकाश विषे सूत्रात्मा वायु व्यापक होरहा है, वही आकाशरूप ब्रह्म है, वही ॐकार करके जानने योग्य है ॥ १ ॥

इति प्रथमं ब्राह्मणम् ॥ १ ॥

अथ द्वितीयं ब्राह्मणम् ।

मन्त्रः १

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥

पदच्छेदः ।

त्रयाः, प्राजापत्याः, प्रजापतौ, पितरि, ब्रह्मचर्यम्, ऊषुः, देवाः, मनुष्याः, असुराः, उषित्वा, ब्रह्मचर्यम्, देवाः, ऊचुः, ब्रवीतु, नः, भवान्, इति, तेभ्यः, ह, एतत्, अक्षरम्, उवाच, द, इति, व्यज्ञासिष्टाः, इति, व्यज्ञासिष्म, इति, ह, ऊचुः, दाम्यत, इति, नः, आत्थ, इति, ॐ, इति, ह, उवाच, व्यज्ञासिष्ट, इति ॥

अन्वयः	पदार्थाः
प्रजापतौ	प्रजापति
पितरि	पिता के पास
देवाः	देव
मनुष्याः	मनुष्य
असुराः	असुर
त्रयाः	तीनों
प्राजापत्याः	प्रजापति के पुत्र
ब्रह्मचर्यम्	ब्रह्मचर्य व्रतके लिये
ह	निश्चयकरके
ऊषुः	वास करते भये
देवाः	देवता लोग
ब्रह्मचर्यम्	ब्रह्मचर्य व्रत को
उषित्वा	करके
+ प्रजापतिम्	प्रजापति से
ह	स्पष्ट
इति	ऐसा
ऊचुः	कहा कि
भवान्	आप
नः	हम लोगों को
अनुशासनम्	अनुशासन
ब्रवीतु	देवैं
इति	ऐसा
श्रुत्वा	सुन कर

अन्वयः	पदार्थाः
इति	इस प्रकार
तेभ्यः	देवों के निमित्त
एतत्	इस
द	द
अक्षरम्	अक्षर को
ह	स्पष्ट
उवाच	प्रजापति कहता भया
+ च	और
+ पुनः	फिर
इति	ऐसा
+ उक्त्वा	कहकर
+ पप्रच्छ	पूछता भया कि
यूयम्	तुम लोगों ने
व्यज्ञासिष्टाः	इसका अर्थ जान लिया
इति	ऐसा सुनकर
+ देवाः	देवतों ने
ऊचुः	कहा कि
व्यज्ञासिष्म इति	हम लोग ऐसा समझ गये कि
दाम्यत	इन्द्रियोंको दमन करो
इति नः	ऐसा हमसे
आत्थ	आप कहते हैं

इति=ऐसा	उवाच=बोले
+ श्रुत्वा=सुन कर	ॐ=ठीक
+ प्रजापतिः=प्रजापति	व्यज्ञासिष्ट=तुम सब समझे

भावार्थ ।

प्रजापति के तीन पुत्र देवता, मनुष्य और असुर हैं, तीनों प्रजापति के पास ब्रह्मचर्य व्रत के निमित्त वास करते रहे, इनमें से प्रथम देवता प्रजापति के पास जाकर बोले कि हे भगवन्! आप हम लोगों को कुछ उपदेश देवें, प्रजापति ने उनको " द " अक्षर का उपदेश दिया, और फिर उनसे पूछा कि क्या तुम लोगों ने " द " इस अक्षर का अर्थ समझ लिया है ? देवताओं ने कहा हां हमलोग समझ गये हैं, आप हमसे कहते हैं कि तुम सब लोग इन्द्रियों का दमन किया करो, इस पर प्रजापति बोले कि हां तुम लोगों ने इस " द " अक्षर का अर्थ ठीक समझ लिया है, इसका भाव ऐसाही है जैसा तुम लोगों ने समझा है ॥ १ ॥

मन्त्रः २

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षर-मुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥

पदच्छेदः ।

अथ, ह, एनम्, मनुष्याः, ऊचुः, ब्रवीतु, नः, भवान्, इति, तेभ्यः, ह, एतत्, एव, अक्षरम्, उवाच, द, इति, व्यज्ञासिष्टाः, इति, व्यज्ञा-सिष्म, इति, ह, ऊचुः, दत्त, इति, नः, आत्थ, इति, ॐ, इति, ह, उवाच, व्यज्ञासिष्ट, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
अथ ह=इसके उपरान्त		इति=ऐसा	
मनुष्याः=मनुष्य		ऊचुः=कहते भये कि	
एनम्=इस प्रजापति से		भवान्=आप	

नः=हम लोगों को
ब्रवीतु=अनुशासन करें
इति=ऐसा
+ श्रुत्वा=सुन कर
तेभ्यः=मनुष्यों के लिये भी
एतत् एव=यही
द=द
अक्षरम्=अक्षर
इति=करके
उवाच=प्रजापति उपदेश करता भया
+ च=और
पुनः=फिर
+ पप्रच्छ इति=मनुष्यों से ऐसा पूंछता भया कि
व्यज्ञासिष्टाः=क्या तुम सब समझ गये हो
इति=तब
ऊचुः=मनुष्य बोले कि
व्यज्ञासिष्म इति=हम सब ऐसासमझे कि
दत्त इति=दान करो ऐसा
नः=हम से
आत्थ=आप कहते हैं
ह=तब
इति=ऐसा
+ प्रजापतिः=प्रजापति
उवाच=मनुष्यों से कहता भया कि
ॐ=ठीक
व्यज्ञासिष्ट=तुम सब समझ गये हो

भावार्थ ।

देवताओं के पश्चात् मनुष्यगण प्रजापति के पास पहुँचे और कहा हे भगवन् ! हमको भी आप उपदेश दें, इनको भी इसी अक्षर "द" का उपदेश प्रजापति ने दिया, और फिर उनसे पूंछा कि क्या तुमने "द" अक्षर का अर्थ समझ लिया है, इस पर मनुष्यों ने कहा हे पितामह ! जो आपने "द" अक्षर का उपदेश किया है उससे आपने हमलोगों से कहा है कि तुम सब कोई दान किया करो, ऐसा हमारे समझ में आया है, सो ठीक है या नहीं इस पर प्रजापति ने कहा कि तुम सब लोगों ने हमारे आशय को भली प्रकार समझ लिया है, जाव ऐसाही किया करो ॥ २ ॥

मन्त्रः ३

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न

आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्दद इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥

इति द्वितीयं ब्राह्मणम् ॥ २ ॥

पदच्छेदः ।

अथ, ह, एनम्, असुराः, ऊचुः, ब्रवीतु, नः, भवान्, इति, तेभ्यः, ह, एतत्, एव, अक्षरम्, उवाच, द, इति, व्यज्ञासिष्टाः, इति, व्यज्ञासिष्म, इति, ह, ऊचुः, दयध्वम्, इति, नः, आत्थ, इति, ॐ, इति, ह, उवाच, व्यज्ञासिष्ट, इति, तत्, एतत्, एव, एषा, दैवी, वाक्, अनुवदति, स्तनयित्नुः, ददद, इति, दाम्यत, दत्त, दयध्वम्, इति, तत्, एतत्, त्रयम्, शिक्षेत्, दमम्, दानम्, दयाम्, इति ॥

अन्वयः	पदार्थाः	अन्वयः	पदार्थाः
अथ ह=मनुष्यगण के पीछे		+ पुनः=फिर	
एनम्=प्रजापति से		इति=ऐसा	
असुराः=दैत्यलोग		पप्रच्छ=पूछता भया कि	
इति=ऐसा		व्यज्ञासिष्टाः=क्या तुम सब समझ गये	
ऊचुः=बोलते भये कि		इति=इस पर	
नः=हमारे लिये भी		ऊचुः इति=असुर ऐसा बोले कि	
भवान्=हे भगवन् ! आप		नः=हम से	
+अनुशासनम्=उपदेश		आत्थ=आप कहते हैं कि	
ब्रवीतु=देवें		दयध्वम्=दया करो	
इति=ऐसा		इति=ऐसा	
+ श्रुत्वा=सुन कर		व्यज्ञासिष्म=हम लोग समझे हैं	
द=द		+ प्रजापतिः=प्रजापति	
इति=ऐसे		इति=तब	
एतत् एव=इस		उवाच ह=बोले कि	
अक्षरम्=एक अक्षर को		व्यज्ञासिष्ट=तुम सब ठीक समझ गये हो	
तेभ्यः=असुरों के लिये भी		तदेव=वही	
उवाच=प्रजापति कहता भया			
+ च=और			

एतत्=यह प्रजापति का अनुशासन है	दत्त=दान करो
तत्=इसी को	दयध्वम्=दया करो
एषा=यह	इति=इस प्रकार
